संस्कृतव्याकरणम्

MAVYC203

लघुशब्देन्दुशेखरः - 1

तृतीयपत्रम्

पूर्णाङ्काः – 80

समयः – घण्टात्रयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। 1×10 =10

1. लघुशब्देन्दुशेखरस्य रचनाकारः कः ?
2. नागेशभट्टस्य पितुर्नाम किमासीत् ?
3. अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रेण किं विधीयते ?
4. वृद्धिरादैच् इति सूत्रस्य वाक्यार्थः कः ?
5. स्थानेऽन्तरतमः इत्यत्र तमप्ग्रहणं किमर्थम् ?
6. अनेकाल्शित्सर्वस्य इत्यत्र शित उदाहरणं किम् ?
7. अनचि च इत्यत्र च किमर्थकः?
8. क्रियावाचिनो भ्वादयः इत्यत्र भ्वादयः किम् ?
9. लोपः शाकल्यस्य इत्यत्र अशि इत्यस्यानुवृत्तिः कुतः आयाति?
10. न पदान्त इत्यस्मिन्सूत्रे द्विवचनसवर्णादिग्रहणं किमर्थम् ?

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः। 6×5 =30

11. वर्णानामुच्चारणस्थानं वर्णयत।
12. 'येन विधिस्तदन्तस्ये 'ति सूत्रस्थायाः 'येने 'ति तृतीयायाः सिद्धान्तार्थं प्रतिपादयत।
13. इको गुणवृद्धी, इति सूत्रस्य परिभाषात्वं वर्णयत।
14. अचोन्त्यादि टि, इति सूत्रं प्रतिपदं विभज्य तेषाम् अर्थं प्रतिपादयत।
15. 'निपात एकाजि'ति सूत्रं नागेशदिशा व्याकुर्वन्तु।
16. नृत्तावसाने नटराज..... इत्यादि कारिकां सम्पूर्णं विलिख्य व्याकुर्वन्तु।
17. प्रतिज्ञाऽनुनासिक्याः पाणिनीयाः इति वाक्यस्याभिप्रायः कः ?

अधस्तनेषु प्रश्नेषु चत्वारः समाधेयाः। 10×4 =40

18. 'अइउण्' इत्यादीनां संज्ञासूत्रत्वं प्रतिपाद्य 'स्वौजस्' इत्यादीनां सुबादिसंज्ञासूत्रत्वं स्वादिविधायकत्वञ्च निरूपयत।
19. 'सुप्तिङन्तं पदम्' इति सूत्रघटकीभूतस्यान्तग्रहणस्य प्रयोजनं विवेचयत।
20. 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रं प्रतिपदं विभज्य व्याकुर्वन्तु।
21. 'र'प्रत्याहारः कथं खण्डितो नागेशेनेति सयुक्तिकं सिद्धान्तं स्थापयन्तु।
22. प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न, इति भाष्यपङ्क्तिं नागेशदिशा वर्णयत।
23. एचोऽयवायावः इति सूत्रं नागेशदिशा प्रतिपादयतु।

****